षेव, ऋ ञ ङ सेवने। इति कविकल्पद्रुमः॥(भ्वा०-उभ०-आत्म०-च-सक-सेट्।) ऋ, असिषेवत्। ञ, सेवति सेवते। ङ, सेवते। सेवनमाराधनमुपभोग आश्रयणञ्च। विष्णुं सेवते सुखं सेवते तीर्थं सेवते साधुः। अन्ये त्वस्मात् परस्मैपदमनन्यमानाः नीचं समृद्धमपि सेवति नीच एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिन इत्यादौ गणकृतानित्यत्वमाहुः। इति दुर्गादासः॥

षै, क्षये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) मूर्द्धन्यादिः। षायति। इति दुर्गादासः॥

षो, य नाशे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) मूर्द्धन्यादिः। नाश इह नष्टीकरणम्। य, स्यति यमो जन्तून्। इति दुर्गादासः॥

षोड़न्, [त्]पुं (षट् दन्ता अस्य। "पृषोदरादीनि यथोपदिष्टम्।" ६।३।१०९। इति षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वञ्च।) षड्दन्तयुक्तवृषः। इति हेमचन्द्रः॥

षोड़श,[न्]त्रि, (षट् च दश च। "पृषोदरादीनि यथोपदिष्टम्।" ६।३।१०९। इति साधुः।) संख्याविशेषः। षड़धिका दश। षोल इति भाषा। तद्वाचकौ इन्दुकलामातृकाशब्दौ। इति कविकल्पलता॥ नित्यबहुवचनान्तोऽयम्॥ (यथा, मनुः। ११। २४९।

"सव्याहृतिप्रणवकाः प्राणायामास्तु षोड़श।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः॥")

षोड़शः, त्रि, षोड़शानां पूरणः। षोड़शन्शब्दात् डट्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी। (यथा, भागवते। २।९।६।

"स्पर्शेषु यत् षोड़शमेकविंशं
निष्कञ्चनानां नृप यद्धनं विदुः॥")

षोड़शकलाः, स्त्री, (षोड़शसंख्यान्विताः कलाः।) चन्द्रमण्डलस्य षड़धिकदशभागाः। तासां नामानि यथा। ततश्चन्द्रस्य अमृतादिषोड़शकलाः पूर्व्ववत् प्राणप्रतिष्ठां कृत्वा पूजयेत्। अं अमृतायै नमः १। आं मानदायै २। इं पूषायै ३। ईं तुष्ट्यै ४। उं पुष्ट्यै ५। ऊं रत्यै ६। ऋं धृत्यै ७। ॠं शशिन्यै ८। ऌं चन्द्रिकायै ९। ॡं कान्त्यै। १० एं ज्योत्स्नायै ११। ऐं श्रियै १२। ओं प्रीत्यै १३। औं अङ्गदायै १४। अं पूर्णायै २५। अः पूर्णामृतायै १६। नमः सर्व्वत्र। शक्तश्चेत् प्रत्येकमावाह्य मन्त्रादिभिः पूजयेत्। इति तन्त्रसारः॥

षोड़शदानं, क्ली, (षोड़शप्रकारं दानम्।) श्राद्धादौ षोड़शप्रकारदेयद्रव्यम्। तत्क्रममाहुः साम्प्रदायिकाः।

"भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम्।
ताम्बूलच्छत्रगन्धाश्च माल्यं फलमतः परम्॥
शय्या च पादुका गावः काञ्चनं रजतं तथा।
दानमेतत् षोड़शकं प्रेतमुद्दिश्य दीयते॥"

तत् षोड़शषोड़शकैरेको दानसागरो भवति॥ तत्र भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमेर्द्देवता विष्णुः षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणीकरणम्। तद्भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम्॥ १॥ आसनस्य उत्तानाङ्गिरसो देवता राज्यस्थानानुत्तमस्वर्गप्राप्तिः फलम्। तत्र विशेषानुपदेशात् करमध्यात्माग्नेयेन तीर्थेन प्रतिग्रहः। एवमन्यत्रापि आग्नेयं करतलम्॥ २॥ जलस्य वरुणो देवता तृप्तिप्राप्तिः फलम्॥ ३॥ वस्त्रस्य बृहस्पतिर्द्देवता चन्द्रसालोक्यप्राप्तिः फलम्। प्रतिग्रहे दशान्तग्रहणपरिधाने॥ ४॥ दीपस्य अग्निर्द्देवता उत्तमचक्षुःप्राप्तिः फलम्॥ ५॥ अन्नस्य प्रजापतिर्देवता अक्षयसुखप्राप्तिः फलम्। प्रतिग्रहे मुष्टिग्रहणम्॥ ६॥ ताम्बूलस्य वनस्पतिर्देवता मेधावित्वसुभगत्वप्राज्ञत्वदर्शनीयत्वप्राप्तिः फलम्॥७॥ छत्रस्य उत्तानाङ्गिरसो देवता सर्व्वव्याधिविनिर्मुक्तत्वश्रीमत्त्वबहुपुत्रत्वप्राप्तिः फलम्। प्रतिग्रहे दण्डधारणम्॥ ८॥ गन्धस्य गन्धर्व्वो देवता ब्रह्मपदप्रयाणं फलम्॥ ९॥ माल्यस्य वनस्पतिर्देवता अत्यन्तसुखित्वभवनं फलम्॥१०॥ फलस्य वनस्पतिर्देवता मुदा युक्तत्वं फलम्॥ ११॥ शय्यायाः उत्तानाङ्गिरसो देवता अत्यन्तसुखित्वभवनं फलम्। प्रतिग्रहे आरोहणम्॥ १२॥ पादुकायुगलस्य उत्तानाङ्गिरसो देवता सर्व्वलोकसुखगमनं फलम्। प्रतिग्रहे आरोहणम्॥ १३॥ धेनो रुद्रो देवता सूर्य्यलोकप्राप्तिः फलम्। तत्र धेनुं प्राङ्मुखीमात्मसमीपमानीय।

"ॐ या लक्ष्मीः सर्व्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ देवस्था या च रुद्राणी शङ्करस्य च या प्रिया।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ विष्णोर्वक्षसि या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
या लक्ष्मीः सर्व्वभूतानां सा धेनुर्वरदास्तु मे॥
ॐ चतुर्मुखस्य या लक्ष्मीः स्वाहा चैव विभावसोः।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥
ॐ स्वधा त्वं पितृसंघानां स्वाहा यज्ञभुजां यतः।
सर्व्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे॥
सर्व्वदेवमयीं देवीं सर्व्ववेदमयीन्तथा।
सर्व्वलोकनिमित्ताय सर्व्वलोकमयीं शिवाम्।
प्रयच्छामि महाभागामक्षयाय सुखाय च॥"

इत्युच्चार्य्य उत्सृजेत्। प्रतिग्रहे पुच्छधारणम्॥ १४॥ हिरण्यस्याग्निर्देवता दीर्घायुःप्राप्तिः फलम्॥ १५॥ रजतस्य चन्द्रमा देवता उत्तमरूपप्राप्तिः फलम्॥ १६॥ इति शुद्धितत्त्वम्॥*॥ गयापद्धत्युक्तषोड़शदानं यथा,

"स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः।
गृहं भूमिर्द्दशी वस्त्रं शय्या छत्रमुपानही॥
दासत्वं पितृयज्ञेषु दानं षोड़शकं मतम्॥"

इति वायुपुराणे गयामाहात्म्यम्॥

षोड़शभुजा, स्त्री, (षोड़श भुजा यस्याः।) षोड़शहस्तयुक्ता दुर्गा। यथा,—

"यदा तु षोड़शभुजां महामायां प्रपूजयेत्।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु॥
कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः।
द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि॥
चतुर्द्दश्यां महामायां बोधयित्वा विधानतः।
गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः॥
अयाचितं बुधः कुर्य्यात् उपवासं परेऽहनि।
एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्॥
ज्येष्ठायान्तु समभ्यर्च्य मूलेन प्रतिपूजयेत्।
उत्तरेणार्च्चनं कृत्वा श्रवणान्ते विसर्ज्जयेत्॥"

इति कालिकापुराणे ५९ अध्यायः॥

षोड़शमातृकाः, स्त्री, (षोड़शसंख्यकाः मातृकाः।) षोड़शसंख्यकदेवीविशेषः। यथा। गौर्य्यादिषोड़शमातृकाभ्यो नमः। इति दुर्गोत्सवपद्धतिः॥ तासां नामानि यथा, श्राद्धतत्त्वे।

"गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह।
आदौ विनायकः पूज्यः अन्ते च कुलदेवता॥"

षोड़शर्त्विक्क्रतुः, पुं, (षोड़श ऋत्विजो यत्र। तादृशः क्रतुः।) षोड़शपुरोहितसाध्ययागविशेषः। स तु ज्योतिष्टोमयागः। द्वादशाहसाध्यसत्रयागश्च। यथा। ज्योतिष्टोमे द्वादशशतगोदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतीभूते सत्रात्मके द्वादशाहसाध्ये शतेनाहीनो दीक्षयन्तीत्यादिदर्शनेन निर्णीयते। तत्र विभागमनुरप्याह।

"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशैकपादिनः॥"

दक्षिणा गोशतविभागाय श्रौतकात्यायनोऽपि। अथ द्वादश द्वादश आद्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः। इत्यत्र षोड़शर्त्विजां चतुरश्चतुरः कृत्वा चत्वारो वर्गाः। इति मलमासतत्त्वम्॥*॥ एषां ऋत्विजां नामानि यथा ब्रह्मा १ ब्राह्मणाच्छंसी २ आग्नीध्रः ३ पोता ४। एते सार्व्ववेदीयाः। होता५ मैत्रावरुणः६ अच्छावाक्७ ग्रावस्तोता ८। एते ऋग्वेदिनः। अध्वर्य्युः ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२। एते याजुषाः। उद्गाता१३ प्रस्तोता१४ प्रतिहर्त्ता १५ सुब्रह्मण्यः१६। एते सामगाः। इति महाभारते मोक्षधर्म्मे १०५ अध्याये नीलकण्ठटीका॥

षोड़शांशुः, पुं, (षोड़श अंशवो यस्य।) शुक्रः। इति शब्दमाला॥ षोड़शाकारयुक्ते, त्रि